## संस्कृत वार्ता:

**दिनाङ्क** :- 14.09.2026 **प्रात**: - 06:55

**अथवार्ताः**

**ब्रिक्स-सम्पन्नम्**

राष्ट्रिय-राजधान्यां नवदिल्ल्याम् अष्टादश-ब्रिक्स-शिखर-सम्मेलनं सम्पन्नम्। सम्मेलनस्य समापन-वेलायां प्रधानमन्त्री नरेन्द्रमोदी विशेषतया निरूपितवान् यत् विविधता एव ब्रिक्स-समूहस्य अभिज्ञानं भवेत्, सहकारः अस्य प्रेरणा स्यात्, अथ अस्य प्रगतिः समग्र-मानवतायाः हिताय भवेत्। द्विदिवसीयस्य अस्य शिखर-सम्मेलनस्य अन्तिमे दिने स्वकीय-समापन-सम्बोधने प्रधानमन्त्री अवोचत् यत् ब्रिक्स इति न केवलं राष्ट्राणां समूहः, अपितु समाधानानाम् एकं पारिस्थितिकी-तन्त्रम् वर्तते। तेन प्रतिपादितं यत् विगतयोः दिनद्वयोः जाताभिः मन्त्रणाभिः अयं दृढ-प्रत्ययः अधिकं पुष्टङ्गतः। श्रीमोदी आशां प्राकटयत् यत् सम्मेलने स्वीकृतं नवदिल्ली-घोषणापत्रम् प्रकटित-दृष्टये आगामि-सहकाराय च सुस्पष्टां दिशं निर्दिशेत्। सः सर्वाणि निष्पन्नानि परिणामात्मक-लक्ष्याणि समय-बद्ध-कार्येषु परिणमयितुम्, अन्त्योदय-प्रभावं जनयितुं च बलमददात्। इतः पूर्वम्, उद्घाटन-भाषणे प्रधानमन्त्री मोदी न्यरूपयत् यत् ब्रिक्स-समूहे सुदृढतायाः संवर्धने विशेष-बलं दत्तम् अस्ति,यतो हि वैश्विक-सङ्क्रमणेन, जलवायु-आपद्भिः, आपूर्ति-शृङ्खला-विघ्नैश्च स्पष्टीभूतं यत् अद्यतनस्य परस्पर-सम्बद्धस्य विश्वस्य कोऽपि सङ्कटः केवलम् एकस्मिन् एव क्षेत्रे सीमितः न तिष्ठति।

**विदेशमन्त्रालय-संवादः**

विदेश-मन्त्रालयेन विज्ञापितं यत् नवदिल्ल्यां सम्पन्नेन अष्टादश-ब्रिक्स-शिखर-सम्मेलनेन बहवः मूर्त-विकासोन्मुख-परिणामाः सञ्जाताः। नवदिल्ल्यां वार्ताहरान् सम्बोधयता विदेश-मन्त्रालयस्य सचिवेन सुधाकर-दलेल इत्यमुना न्यरूप्यत यत् विविधेषु विषय-क्षेत्रेषु पञ्चाशदधिकाः मूर्त-परिणामाः प्राप्ताः, एतां उपलब्धिं सः भारतस्य ब्रिक्स-अध्यक्षतायाः महत्या सिद्धित्वेन वर्णितवान्।

**प्रधानमन्त्री-उपवेशनम्**

प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्यां समनुष्ठिते ब्रिक्स-शिखर-सम्मेलने उच्च-स्तरीय-द्विपक्षीय-वार्तानाम् बहूनि उपवेशनानि अकरोत्। विगतेषु त्रिषु दिवसेषु प्रधानमन्त्रिणा विविध-देशानां शासनाध्यक्षैः राष्ट्राध्यक्षैश्च सह पञ्चदश-द्विपक्षीयोपवेशनानि आचरितानि। एतदतिरिच्य तेन विश्व-नेतृभिः, अन्ताराष्ट्रिय-संस्थानां प्रमुखैश्च सह काश्चन अनौपचारिकाः संक्षिप्त-मन्त्रणाः अपि विहिताः।एताभिः मन्त्रणाभिः द्विपक्षीय-सम्बन्धानां दृढीकरणाय, परस्पर-हित-सम्बद्धेषु विषयेषु विचार-विमर्शाय, अथ च क्षेत्रीय-वैश्विक-घटनाक्रमेषु स्व-दृष्टिकोणस्य आदान-प्रदानाय महत्वपूर्णः अवसरः समुपलब्धः।

**शाह-हिन्दीदिवसः**

केन्द्रीय-गृहमन्त्री अमित-शाहः अद्य मुम्बई-नगरे षड्विंशत्यधिक-द्विसहस्रतमस्य हिन्दी-दिवसस्य अथ च षष्ठस्य अखिल-भारतीय-राजभाषा-सम्मेलनस्य उद्घाटन-सत्रं सम्बोधयिष्यति। गृह-मन्त्रालयान्तर्गतस्य राजभाषा-विभागस्य तत्त्वावधाने आयोज्यमाने अस्मिन् द्विदिवसीये सम्मेलने हिन्दी-भाषायाः संवर्धनम्, अन्याभिः भारतीय-भाषाभिः सह अस्याः समन्वयः इति विषये विचार-विमर्शार्थं विद्वांसः, साहित्यकाराः, शिक्षाविदः, वरिष्ठ-सर्वकारीय-अधिकारिणश्च एकत्र आगमिष्यन्ति।

**गणेशचतुर्थी**

कृत्स्ने हि देशे अद्य गणेश-चतुर्थीपर्व महता भक्ति-भावेन श्रद्धया च आचर्यते। अयं पावनदिवसः ऋद्धि-बुद्धि-सिद्धीनां प्रतीक-भूतस्य भगवतः श्रीगणेशस्य जन्मोत्सवत्वेन आमान्यते। विनायक-चतुर्थी उत गणेशोत्सवः इति नाम्ना प्रसिद्धः अयं दिनविशेषः दश-दिवसीयानाम् उत्सव-कार्यक्रमाणां शुभारम्भं सूचयति, यस्मिन् भक्ताः स्वकीय-गृहेषु मण्डपेषु च भगवतः गणेशस्य मृण्मयीं प्रतिमानं प्रतिष्ठाप्य विधिवत् पूजार्चनं कुर्वन्ति।

**ऋतुविभागः**

भारत-ऋतु-विज्ञान-विभागेन अद्य गुजरात-राज्ये अति-तीव्रवृष्ट्यै नारङ्ग-वर्णपरा सञ्चेतना प्रकाशिता । ऋतु-विज्ञान-विभागानुसारम् अद्य राष्ट्रिय-राजधान्यां नवदिल्ल्याम्, हरियाणाराज्ये, चण्डीगढे, पञ्जाबे, पूर्व-राजस्थाने, असमे, अरुणाचलप्रदेशे च अतिवृष्टिः सम्भाव्यते।

**क्रिकेट-क्रीडा**

गतरात्रौ दुबई-नगरे अनुष्ठितायां महिलानां विंशति-प्रतिविंशतिः एशिया-चषक-प्रतिस्पर्धायाः अन्तिम-स्पर्धायां भारतेन श्रीलङ्का-दलं द्विसप्तति-धावनाङ्कैः पराजितम्। स्पर्धायां पूर्वं कन्दुक-ताडनं कुर्वता भारतीय-दलेन विंशति-क्षेपणचक्रेषु पञ्च-क्रीडकानां हानौ त्र्यशीत्यधिक-शतं धावनाङ्काः समर्जिताः। प्रत्युत्तरे, श्रीलङ्का-दलं विंशति-क्षेपणचक्रेषु सप्त-क्रीडकानं हानौ एकादशाधिक-शतमेव धावनाङ्कान् समार्जयत्।

॥ **इति वार्ता**॥